लोकस्तेजोमय उदाहृतः। वैराजा यत्र ते देवा वसेयुर्देव पूजिताः। वासुदेवे मनो येषां वासुदेवार्पितक्रियाः। तपसातोष्य गोविन्दमभिलाषविवर्जिताः। ते तपोलोकमासाद्य वसन्ति विजितेन्द्रियाः। शिलोञ्छवृत्तयो ये वै दन्तोलूखलिकाश्च ये। येऽश्मकुट्टाश्च मुनयः शीर्णपर्णाशिनश्च ये। ग्रीष्मे पञ्चाग्नितपसो वर्षासु स्थण्डिलेशयाः। हेमन्ते शिशिरे वा ये तपन्ति सलिले चराः। कुशाग्रनीरविन्दूंश्च तृषिता यतयोऽपिबन्। वाताशिनोऽतिक्षुधिताः पादाङ्गुष्ठाग्रभूस्पृशः। ऊर्द्ध्वहस्ता रविदृशस्त्वेकाचिस्थाननिश्चलाः। ये वै दिवा निरुच्छ्वासा मासोच्छ्वासाश्च ये परे। मासोपवासं कुर्वन्ति चातुर्मास्यव्रताश्च ये। ऋतवन्ते तोयपाना ये ये षण्मासोपवासकाः। ये च वर्षनिमेषा वै वर्षधाराम्बुतर्पकाः। स्थाणुसाम्योपसंप्राप्ता मृगकण्डूतिसौख्यदाः। जटाटवीकोटरान्तःकृतनीडाण्डजाश्च ये। प्ररूढवल्मीकाङ्गाश्च स्नायुनद्धास्थिसञ्चयाः। लताप्रतानैः परितो वेष्टितावयवाश्च ये। शस्यानि च प्ररूढानि यदङ्गेषु महीपते। इत्यं तैर्नियमैर्ये तु क्लिष्टात्मानस्तपोधनाः। ब्रह्मायुषस्तपोलोके ते वसन्त्यकुतोभयाः"। १५माघे मासि "तपाश्च तपस्यश्च शैशिरावृतू" यजु० २७।२४ "तपसे त्वा" यजुः ७।३०। तपसे माघाय। तपति सूर्यो यत्र असुन् तपाः" वेददी०। तत्र हि उत्तरायणप्रवृत्तौ रवेः प्रखरकरता अतएवाह "मकरे प्रखरो रविः"। १६धर्मे "विनाप्यस्मदलं भूष्णुरिज्यायै तपसः सुतः" माघः १७नियमे "समाधिमास्थाय तपोभिरात्मनः" निशम्य चैनां तपसे कृतोद्यमाम्" "तपः क्व वत्से क्व च तावकं वपुः" कुमा० "तपसा किल्बिषं हन्ति विद्ययाऽमृतमश्नुते" वेदान्तप०। "तमेतं ब्राह्मणा विविदिषन्ति वेदानुवचनेन यज्ञेन तपसा नाशकेन" श्रुतिः। "ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम्। वैश्यस्य तु तपोवार्त्ता तपः शूद्रस्य सेवनम्" मनुः तपश्च योगसाधनं क्रियायोगभेदः यथोक्तं पात०सू० भाष्यविवरणेषु "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" सू०। "नातपस्विनो योगः सिद्ध्यति अनादिकर्मक्लेशवासनाचित्रा प्रत्युपस्थितविषयजाला चाशुद्धिः नान्तरेण तपःसम्भेदमापद्यते इति तपस उपादानं तच्चित्तप्रसादनमबाधमानमनेनासेव्यमिति मन्यते" भा०। "व्यतिरेकमुखेन तपस उपायत्वमाह नातपस्विन इति तपसोऽवान्तरव्यापारमुपायोपयोगित्वं दर्शयति अनादि कर्मेति। अनादिभ्यां कर्मक्लेशवासनाभ्यां चित्रा अतएव प्रत्युपस्थितमुपनतं विषयजालं यस्यां सा तथोक्ता। अशुद्धीरजस्तमःसमुद्रेको नान्तरेण तपःसम्भेदमापद्यते सान्द्रस्य नितान्तविरलता सम्भेदः ननूपादीयमानमपि तपो धातुवैषम्यहेतुतया योगप्रतिपक्ष इति कथं तदुपाय इति। अत आह। तच्चेति तावन्मात्रमेव तपश्चरणीयं न यावता धातुवैषम्यमापद्यतइत्यर्थः" विवरणम्। १८अग्नौ तपोजाः।

**तपस** पु० तप—असच्। १सूर्य्ये २चन्द्रे त्रिका०। ३खगे सि०कौ०

**तपसोमूर्त्ति** पु० चतुर्थमन्वन्तरे आङ्गिरसे सप्तर्षिभेदे तपोधृतिशब्दे दृश्यम्। [तस्य इतरतपस्याद्देषित्वात् तथात्वम्।

**तपस्तक्ष** पु० तपस्तक्षति तक्ष—अण् उप० स०। इन्द्रे हेमच०।

**तपस्य** तपः करोति तपस्+कृतौ क्यच् अक० सेट्। तपस्यति अतपस्यीत् अतपसीत् तपस्या। "स्थाणुं तपस्यन्तमधित्यकायाम्" कुमा०।

**तपस्य** पु० तपसि साधु यत्। १फाल्गुने मासि अमरः। "तपाश्च तपस्यश्च शैशिरावृतू: यजु०१५।५७ "तपस्याय त्वा" ७।३०।२अर्जुने, तस्य फाल्गुननामकत्वात् तथात्वम्। भावे अ तपस्या। ३तपश्चर्य्यायां स्त्री। तपसि भवः यत्। ४तपोभवे त्रि० "स्विद्यान्चेतु तपस्याभ्योऽद्भ्यः स्वाहा" कात्या० श्रौ० २५।११।२८। तपस्य—भावे घञ्। ५तपश्चरणे पु०। "अथास्य बुद्धिरभवत्तपसे भरतर्षभ"। भा० आनु० ६अ०। तामसस्य मनोः ६पुत्रभेदे पु० "पुत्रांश्चैव प्रवक्ष्यामि तामसस्य मनोर्नृप! द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोऽशनः। तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः" हरिवं० ७अ०

**तपस्यामत्स्य** पुं स्त्री (तपसी)। मत्स्यभेदे शब्दर०।

**तपस्विन्** त्रि० तपस्+अस्त्यर्थे विनि। १तापसे, २चान्द्रायणादिव्रतधारिणि, ३अनुकम्प्ये, ४दीने ५प्रशस्ततपोयुक्ते च। स्त्रियां ङीप् "किं किं व्यवस्यति न वेद्मि तपस्विनी सा" सा० द०। "नवप्रसूतिर्वरटा तपस्विनी" नैष०। "कस्तपस्विविशिखेषु चादरः" किरा०। "पृथ्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः" रघुः तपस्विभ्योऽधिको योगी" गीता ६नारदे पु० शब्दरत्ना० ७तपस्यामत्स्यभेदे शब्दर०। ८घृतकरञ्जवृक्षे पु० ९चटके पुंस्त्री राजनि० स्त्रियां जातित्वात् ङीष्। १०जटामांस्यां ११कटुरोहिण्यां स्त्री हेमच० गौ० ङीष्। १२महाश्रावणिकायाः स्त्री भावप्र० हरिवंशोक्ते चतुर्थमन्वन्तरे काशयपे १३ऋषिभेदे तपोधृतिशब्दे प्रमाणां दृश्यम्।